# संस्कृतवार्ताः

**दिनाङ्क :-14.02.2025**
**प्रातः - 06:55**

**प्रधानमन्त्री नरेन्द्रमोदी-अमेरिका यात्रा**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अमेरिकीयराष्ट्रपतिना डोनाल्ड ट्रम्पेन सह वाशिङ्गटनडीसीनगरस्य व्हाइटहाउस् इत्यत्र द्विपक्षीयवार्तालाप: कृत:। स्वभाषणे श्रीमोदी अवदत् यत् उभौ भारत-अमेरिका-रणनीतिकसहभागितां अग्रे सारयिष्यतः। सः अवदत् यत्, ट्रम्पेन तेषां सम्बन्धं व्यापकतां सुदृढं च कर्तुं योगदानं प्रदत्तम्। प्रधानमन्त्रिणा टेक्सास्-नगरे हाउडी-मोदी-इवेण्ट्, गुजरात-नगरे नमस्ते ट्रम्प-इवेण्ट्-इत्युभयोः स्मरणं कृतम्। अमेरिकीराष्ट्रपतिनिर्वाचने भव्यं ऐतिहासिकं च विजयं प्राप्तुं श्रीमोदी ट्रम्पाय अभिनन्दितवान्। सः अवदत्, गतवर्षे भारतीयाः तस्मै तृतीयवारं क्रमशः तेषां सेवायाः अवसरं दत्तवन्तः। सः अवदत्, उभौ मिलित्वा द्वयोः राष्ट्रयोः प्रगतिं समृद्धिं च प्रति नेष्यावः। सः अवदत्, एषः युद्धयुगः नास्ति, कूटनीति माध्यमेनापि समाधानं कर्तव्यम् इति। अमेरिकीयसुरक्षा परामर्शदः माइकल वाल्ट्ज् इत्येषः टेस्ला स्पेसएक्स् इत्यस्य एलोन् मस्क् इत्येषः भारतीय-अमेरिकीयः उद्यमी विवेकरामास्वामी च प्रधानमन्त्रिणा मोदिना सह मिलितवन्तः। अस्माकं वार्ताहरः सूचितवान् यत् राष्ट्रपतेः ट्रम्पस्य द्वितीयराष्ट्रपतिकार्यकालस्य उद्घाटनानन्तरं प्रधानमन्त्रिणः मोदिनः अमेरिकादेशस्य प्रथमा यात्रा अस्ति।

**सीतारामणः - आयकरविधेयकं**

संसदः आय-व्यय संकल्पना सत्रस्य प्रथमचरणस्य समाप्तिः जाता तदनु संसदः द्वयोः सदनयोः आगामिमासस्य दश दिनाङ्कपर्यन्तं अवकाशः अभवत्। लोकसभायाः सभापतिना ओमबिरला इत्यनेन उक्तं यत् सत्रस्य प्रथमचरणे द्वादशाधिकैकशतं प्रतिशतं उत्पादकता अस्ति। ततः पूर्वं लोकसभायां वित्तमन्त्री निर्मलासीतारामणः पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य आयकरविधेयकं प्रस्तुतवती।

**वक्फ**

चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य वक्फ् (संशोधनम्) विधेयकमभिलक्ष्य संयुक्तसमितेः प्रतिवेदनम् ह्यः विपक्षस्य विरोधस्य मध्ये संसदः द्वयोः सदनयोः पुरः स्थापितम्। अपराह्ने द्विवादने स्थगनानन्तरं यदा लोकसभा पुनः आरब्धा तदा संयुक्तसमितेः अध्यक्षः जगदम्बिकापाल सदने प्रतिवेदनं उपस्थापितवान्। विपक्षिसदस्याः कोलाहलं कृतवन्तः। इतः प्राक् विधयकेऽस्मिन् विपक्षिदलानां कोलाहलकारणात् लोकसभा मध्याह्नं द्विवादनं यावत् स्थगितमासीत्।

**मणिपुर-राष्ट्रपतिशसनं**

मणिपुरे मुख्यमन्त्रिणः एनबीरेनसिंहस्य त्यागपत्र प्रदानानन्तरं राज्ये राष्ट्रपतिशासनं प्रवर्तितम् अस्ति। गृहमन्त्रालयेन अस्मिन् विषये आधिकारिकसूचना प्रसारिता अस्ति। अधिसूचनायां उक्तं यत् राष्ट्रपतिः द्रौपदी मुर्मूः मणिपुरराज्यपालात् प्रतिवेदनं प्राप्तवती तथा च प्रतिवेदनस्य विचारं कृत्वा संविधानस्य षड्पञ्चाशदधिक त्रिशतानुच्छेदे प्रदत्ताधिकाराणां प्रयोगेन राज्ये राष्ट्रपतिशासनं प्रवर्तितम् अस्ति। सूचनायां उक्तं यत् विधानसभा अपि तत्र स्थगितास्ति।

**राष्ट्रियक्रीडा- समापनम्**

उत्तराखण्डे अष्टत्रिंशत् तमाया: राष्ट्रियक्रीडायाः अद्य समापनम् भविष्यति। हल्द्वानीनगरे क्रीडायाः समापनसमारोहे केन्द्रीयगृहमन्त्री अमितशाहः मुख्यातिथिरूपेण भागं भजिष्यति। प्रधानमन्त्रिणा नरेन्द्रमोदिना जनवरीमासस्य अष्टाविंशतिः दिनाङ्के देहरादूननगरस्य महाराणाप्रतापक्रीडामहाविद्यालये राष्ट्रियक्रीडायाः उद्घाटनं कृतम्। राष्ट्रियक्रीडायाः समापनसमारोहः अद्य अपराह्ने द्वि वादने हल्द्वानीनगरस्य अन्ताराष्ट्रीयक्रीडासङ्कुले भविष्यति।

**।।इति वार्ता:।।**